श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ उत्सवस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ उत्सवस्तबकः ॥

विख्यात विभवा सा मां विष्णुपत्नी विलोकताम्।
विपुलानुत्सवान् यस्या विरिञ्च्याद्या वितन्वते॥ १॥

विधिशिवप्रमुखा विबुधेश्वराः
विविधमच्युतपत्नि तवोत्सवम्।
अकलयन् सकलस्य शरीरिणो
निरवधीरवधीरयितुं व्यधाः॥ २॥

निरुपमं युवयोः शुभमुत्सवं
जननि लोकयितुं धृतकौतुकाः।
उपगता किल काऽपि परा त्वरा
पुरवधूरवधूतगृहक्रिया॥ ३॥

जननि सत्वरचङ्क्रमसम्भ्रमे
चरणतः पतितौ मणिनूपुरौ।
तव महोत्सव भूभजनोन्मिषत्-
कुतुकया तु कयाचिदनादृतौ॥ ४॥

तव महे गतिमान्द्यकृतौ कुचा-
विति रुषा चलिताशु रमेऽपरा।
अनुगृहीततदञ्चलनिर्गलन्-
नवसरावसरात्ययभीरुका॥ ५॥

श्रुतभवन्महवाद्यरवा जवात्
पथि रमे चलिताभरणस्वनैः।
श्रुतरुतेऽन्तरितेऽस्मि सुवञ्चिते-
त्यपरया परया हसिता वधूः॥ ६॥

www.prapatti.com

महमहीभजनोत्कलिकाकृत-
    द्रुतगतिः श्लथपुष्पसराऽपरा।
कृतवतीव मुदा कुसुमाञ्जलिं
    तव रमे वरमेखल मध्यमा॥ ७ ॥

महजुषस्तव देवि सिसेविषा
    दिशति मन्दगतेरपि सद्गतिम्।
तदिह दिव्यगतिं वितरिष्यसि
    त्वममले मम लेखदुरासदाम्॥ ८ ॥

अभिचकाङ्क्ष मनःप्रभवं जवं
    चरणयोरपि काचन सादरा।
कलयितुं भवतीं कलशाम्बुधेः
    दुहितरं हितरम्यमहोत्सवाम्॥ ९ ॥

जननि तामरसोदरसोदर-
    श्रियमवेक्ष्य सविस्मयमुत्सवे।
न ततृपुर्नरदैवतयोषितः
    शुभवतीं भवतीं सह शौरिणा॥ १० ॥

प्रियतमार्पितयावकपादया
    तव महोत्सव भूर्न यया स्त्रिया।
द्रुतमगामि पदोर्न परं धृतः
    कुपितयाऽपि तयारुणिमा दृशोः॥ ११ ॥

अभिवृषाचलमापततां द्रुतं
    तव रमे परमोत्सवलिप्सया।
अजनि नो पथिभिः समयात्ययो
    दिविषदां विषदान्तरितैरपि॥ १२ ॥

प्रसृमरागरुधूपपरम्परा-
    सुरभिताः शुभदीपशतादृताः।



www.prapatti.com

त्रियुगपत्नि महोत्सवभूमयः
सुरचयं रचयन्ति सविस्मयम्॥ १३॥

तव मह प्रतिनन्दनकम्पितैः
सुरतरोः शिखरैः स्वयमीरिताः।
जननि वेङ्कटशैलमभूषयन्
सुमनसो मनसो हरणक्षमाः॥ १४॥

शुभतराभरणाभरणात्मना
रुचितरङ्गपिशङ्गित सद्मना।
जननि सार्थयसे मरुतां महोत्-
सवपुषा वपुषाऽनिमिषा दृशः॥ १५॥

मधुजिता सममुत्सवमण्टपे
स्थितवतीं भवतीमवलोकितुम्।
अभिरुचिः पुनरात्तकुतूहलैः
निजगृहे जगृहे न वधूजनैः॥ १६॥

अधिमहोत्सवमर्णवकन्यके
परमभक्तिजुषां प्रणतिस्तव।
तनुधनुर्लतया सुदृशां गुरुः
तनतया नतया सुकराऽभवत्॥ १७॥

भजनहर्षज नाटचजवोच्च्वलन्-
मुकुटलोलमरुत्सरिदुत्थितैः।
जलकणैर्भवदुत्सवमेदिनीः
शशिशिराः शिशिराः कुरुते रमे॥ १८॥

त्रिणयनेन विनम्रशिरः क्षरत्-
त्रिदशसिन्धुमहोर्मिभिरुत्सवे।
किमपि पाद्यमदायि पदाब्जयोः
नतवता तव तामरसालये॥ १९॥

तव महे मिलितात् त्रिदशीगणात्
न बिभिदे नरलोक वधूजनः।
त्वदवलोकनविस्मयतो यतो
जननि मे न निमेषमवाप सः॥ २० ॥

प्रणयिना सममुत्सवमण्टपे
स्थितिमतीं भवतीं प्रणिनंसवः।
हरिगिरिं हरिपत्नि समाश्रिताः
त्रिदिविनो दिवि नोपययुः स्पृहाम्॥ २१ ॥

अधिमहं भवतीं कमले स्तुवन्
अभिमुखः स्तिमितेक्षणमग्रतः।
अपि सुरेष्वसुरेषु नरेषु वा
शिरसि को रसिको न दधेऽञ्जलिम्॥ २२ ॥

अधिमहोत्सवमप्सरसां गणैः
सह रमे परभक्तिजुषस्त्वयि।
पुलकिनः कलगद्गदगीतयो
मुनिजना निजनाट्यमदर्शयन्॥ २३ ॥

उपगतोत्सवदिव्यगृहाङ्गणः
कमलवासिनि संयमिनां गणः।
निगमसौरभशोभनया स्तुतिं
स हि गिराऽहिगिरावकरोत् तव॥ २४ ॥

मधुविरोधिपुरन्ध्रि महोत्सवे
शुभगुणग्रथिता किल मालिका।
स्तवमयी स्तबकैस्तव कैर्गिरां
न कलिता कलिताडन काङ्क्षिभिः॥ २५ ॥

तव महे स्तवकोटिचिकीर्षया
दृगधिका रसनाश्चकमे रमे।

रचयितुं स्तवमेकरसज्ञया
    कृशतमं शतमन्युरितत्रपः॥ २६ ॥

तव हरेर्दयिते दृढभक्तितः
    चतसृभिः श्रुतिभिश्चतुराननः।
अभिनुतिं तनुते स्म महोत्सवे-
    ष्वहरहर्हरहर्यभिनन्दिताम्॥ २७ ॥

जननि गन्धवहैर्भवदुत्सवे
    खगपतिः श्रुतिसौरभशोभनैः।
श्रमहरैर्जनितैर्निजपक्षति-
    व्यजनतो जनतोषणमातनोत्॥ २८ ॥

तनुभृतां तव देवि महोत्सवे
    नटनगाननतिस्तवनादयः।
परमभक्तिभरादिह नाभवन्
    श्रमकरा मकरालयकन्यके॥ २९ ॥

पदयुगं तव भक्तिभरादहं
    प्रथमिकामुपगम्य सुरस्त्रिया।
हरिपुरन्ध्रि महेऽङ्गजितस्फुरत्
    कनकया न कया परिचर्यते॥ ३० ॥

दिनकरं तमसामिव राजयः
    कमलवासिनि कल्मषपङ्क्तयः।
अपि विलोकयितुं प्रभवन्ति ते
    जनमहो न महोत्सवदर्शिनम्॥ ३१ ॥

तव महे सुरदानवमानव
    प्रभृतिपादहतिप्रभवै रमे।
क्षितिरजोनिचयैः स्थगितातपो
    दिनकरो न करोति जनव्यथाम्॥ ३२ ॥



www.prapatti.com

अथ तवास्यविधोरवलोकनात्
    सुरकराम्बुरुहाणि महोत्सवे।
मुकुलितान्युडुपङ्क्तिपरिस्फुरन्
    नवरदे वरदे कमलालये॥ ३३॥

मुकुलितं नियमेन कराम्बुजैः
    मुदितमक्षिचकोरकुलैः सताम्।
तव महेऽम्ब हरौ नयनीभवत्
    रविविधौ विविधौजसि भात्यपि॥ ३४॥

तव सिषेविषया विषयान्तर-
    त्यजननिश्चलचेतस उत्सवे।
प्रजहुरम्ब तपोऽपि पराशर-
    प्रभृतयो भृतयोगकलाः स्वयम्॥ ३५॥

सुमनसो मुनयश्च तवोत्सवे
    त्रिदिवधेनुपयोरसधारया।
विरचयन्त्यभिषेकविधान मृक्-
    चयजुषां यजुषां प्रकरै रमे॥ ३६॥

विधिशिवादिसुरेषु तवोत्सवे
    विरचयत्स्वभिषेचनमिन्दिरे।
मनुशतं मुनिमाणवकाः स्फुट-
    ध्वनि जगुर्निजगुर्वभिचोदिताः॥ ३७॥

तव महेष्वभिषेकविधौ कृते
    जगदशेषमगादपतापताम्।
तदिदमद्भुतमम्ब फलिस्थलात्
    फलगतिर्लगति स्म परत्र यत्॥ ३८॥

अथ तवोत्सवधाम्नि बुधाः सुधा-
    करसहोदरि सादरमर्चयन्।

www.prapatti.com

सुरभिलैर्भवतीं श्रुतषट् पदा-
    रवकुलैर्वकुलैरपि चम्पकैः॥ ३९ ॥

मधुलिहां भवदङ्घ्रिसमर्पित-
    प्रसववासवतां कमले तदा।
सुरकिरीटगताब्जगृहे भिदा
    रवलवैर्बलवैरिशिलाकुलात्॥ ४० ॥

सुमनसो भगदङ्घ्रिजुषां रमे
    सुमनसामनुषङ्गत उत्सवे।
तव पदान्तिकभाजमपूजयन्
    सुमलिनामलिनामपि मण्डलीम्॥ ४१ ॥

स्वशिरसा दधतः कुसुमं मुदा
    सुमहिता इति नाद्भुतमुत्सवे।
चरणयोः सुरपङ्क्तिभिरर्पितं
    तव नरा वनराशितनूभवे॥ ४२ ॥

पनसचूतफलादिभिरुज्ज्वलं
    सरससूपमपूपशतावृतम्।
अथ निवेदनमम्ब सुरैः क्षरद्-
    घृतवरं तव रम्यमकल्प्यत॥ ४३ ॥

जननि शेषतया भृशमुत्सुकैः
    तव निवेदितशेषमभुज्यत।
सुमधुरं सुमनोभिरथोत्सवा-
    पवरके वरकेतनभूषिते॥ ४४ ॥

अथ सुधान्यभवं जनमोदनं
    जननि मानसरञ्जनमोदनम्।
भवदवेक्षणसंस्कृतमत्ति यो
    रसनया स न याचति तां सुधाम्॥ ४५ ॥

अधिभवद्भवनाग्रवितर्दिकं
    जननि जाग्रत एव जयादयः।
अगणयन्नमरानपि तावके
    घनमहे न महेन्द्रपुरःसरान्॥ ४६ ॥

जनविमर्दशमोद्यतनिर्दयोद्-
    भटचमूपतिवेत्रहतिस्पृशाम्।
प्रहृतिरस्ति मदम्ब महे तवा-
    र्चनकृतां न कृतान्तकृतान्ततः॥ ४७ ॥

तव महोत्सववैभवदर्शिनां
    तनुभृतां विविधैः स्तवनादिभिः।
प्रमुदिता कमले भवती सतीः
    अपरिपूः परिपूरयति श्रियः॥ ४८ ॥

जननि तस्य जनस्य वृथा सुधा-
    सहभवे विदधे विधिरीक्षणे।
य इह नानुभवेदलसस्तवो-
    त्सवरसं वरसंमदकारणम्॥ ४९ ॥

भवदीयोत्सवविभवं
    फणिपतिवाचस्पतिप्रभृतिवर्ण्यम्।
कथमल्पधियः कवयः
    कथयन्तु क्षीरधेः कन्ये॥ ५० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे उत्सवस्तबकः॥

www.prapatti.com